
# बाणभट्टकृतिषु लोक-शास्त्र-दर्शनम्

# BANABHATTAKRTISHU LOKA-SHASTRA- DARSHANAM

# ಬಾಣಭಟ್ಟಕೃತಿಷು ಲೋಕ-ಶಾಸ್ತ್ರ-ದರ್ಶನಮ್



सम्पादकाः
डा. नागेन्द्रः
डा. मञ्जुनाथभट्टः
डा. तिरुमल पि कुलकर्णी

Scanned by TapScanner

# BANABHATTAKRUTISHU LOKA-SHASTRA- DARSHANAM

Edited by
**Dr. Nagendra**
Asst. Professor, SKSVA College, Adichunchanagiri
Nagamangala Taluk, Mandya District, Karnataka - 571811

**Dr. Manjunath Bhat**
Asst. Professor, Sri Shreematha Sanskrit College
Ummachagi, Yellapura Taluk, Karvara District, Karnataka

**Dr. Tirumala P. Kulkarni**
Professor, Sri Poorna Prajna Vidyapeeta
Bangalore, Karnataka

Published by
**Likith Prakashana**
# 654/2, I Floor, I Main Road,
B.B. Garden Road, Fort Mohalla, Mysore - 570 004.

**ISBN : 978-81-940693-8-6**

**First Impression** : 2019
**Pages** : viii+ 344 =352
© : Author
Copies : 100
Price : ` 275/-
Book Size : demi 1/8
**D.T.P.** : Anukshana Creations
Mob: 8660867073
Susheelendra Goggi
Mob: 9964798748
**Cover Page Design** : Kiran
**Printed at** : Kamal Impressions, Mysuru

Scanned by TapScanner

# ಪರಿವಿಡಿ


| ವಿಷಯ | ಲೇಖಕರು | ಪು.ಸಂ. |
|---|---|---|
| 1. बाणो मे हृदये वसतु | डा. एम्. शिवकुमारस्वामी | 8 |
| 2. बाणभट्टकृतिषु लोकशास्त्रदर्शनम् | डा. लक्ष्मीनारायण भट्टः | 15 |
| 3. कादम्बर्याम् अलङ्कारसौन्दर्यपरामर्शः | आचार्य चक्रवर्तिरङ्गनाथन् | 31 |
| 4. बाणभट्टट्टकृतिषु ज्यौतिषदर्शनम् | Dr. Ramakrishna Pejathaya | 40 |
| 5. कादम्बर्यां वर्णिता गुरुकुलव्यवस्था | डा. राघवेन्द्र भट्टः | 50 |
| 6. बाणभट्टकृतौ हर्षचरिते व्यसनविचारः | डा. वेंकटरमण हेगडे | 57 |
| 7. बाणस्तु साम्राट् कवीनामिह | प्रो. जि. आर्. अम्बलि | 65 |
| 8. बाणभट्टस्य काव्यवैविध्यम्-कादम्बरी | Dr. Veena H. N. | 69 |
| 9. कादम्बरीग्रन्थे शुकनासोपदेशवर्णनम् | डा. श्रीवेङ्कटनाथन् के. इ. | 74 |
| 10. शुकनासोपदेशस्यावश्यकता प्रभावश्च | विद्वान् रवीन्द्र गणपति कोमारः | 78 |
| 11. शुकनासोपदेशानुसारं लक्ष्म्याः माहात्म्यम्, इह लौकिकोपादेयत्वञ्च | डा. अनिलप्रतापगिरिः | 81 |
| 12. बाणस्य शास्त्रपुराणादिषु पाण्डित्यम् | Vidvan H. S. Prashanth Bhat | 92 |
| 13. बाणभट्टकृतिषु लोक-शास्त्र-दर्शनम् | विद्वान् अमरगोपाल गुड्डे | 96 |
| 14. परिसङ्ख्यालङ्कारे बाणचमत्कृतिः | विद्वान् तिम्मण्णः आर् | 101 |
| 15. बाणभट्टस्य शुकनासोपदेशे राजनीतिः | विदुषी कविता भट्टः | 105 |
| 16. बाणभट्टकृतौ विचारविमर्षः | विद्वान् राजेश शास्त्री | 110 |
| 17. हर्षचरिते धर्मशास्त्रोपदेशः | विद्वान् नवीन भट्टः | 114 |
| 18. अथातः कादम्बरीजिज्ञासा | विद्वान् सि. आर्. प्रदीपसिंहाचार्यः | 117 |
| 19. **Bhatta Bana and his works** | Dr. S. Ramaratnam | 123 |
| 20. **A study of Select moral edicts in the prose Kadambari of Bana** | Dr. V. Girishachandra | 128 |

# शुकनासोपदेशस्य आवश्यकता प्रभावश्च

विद्वान् रवीन्द्र गणपति कोमारः
संस्कृतप्राध्यापकः
एस्.बि.कला तथा के.सि.पि विज्ञानमहाविद्यालयः
विजयपुर -586103

महाकवेर्बाणस्य जनिकालविषये वंशादिविषये च न काचन विप्रतिपत्तिः। हर्षचरितस्यादौ तेन वंशादिविवरणं महता विस्तरेण उपस्थाप्यते। जनकोऽस्य चित्रभानुर्जननी राजदेवी च। सम्राजो हर्षस्य समकालीनत्वात् जनिकालोऽस्य ईसवीयसप्तमशताब्द्याः पूर्वार्धोऽङ्गीक्रियते। हर्षचरितं कादम्बरी चेति ग्रन्थद्वयमस्य प्रधानतः कृतित्वेनाङ्गीक्रियते। कृतयोऽन्या विवादविषया एव विदुषाम्।

बाणस्य कृतिद्वयं समीक्ष्यते चेत् तर्हि वाग्देव्या अवतारस्येव बाणस्य कलाकौशलं भाषामाधुर्यं रसप्रवाहश्च प्राप्यते। वर्णनेषु प्रवाहो मनोज्ञत्वं च न क्वचिदपि न्यूनत्वमुपैति। तद्यथा- विलासवत्याः पुत्रहीनताजन्यविषादस्य वर्णनम्, चन्द्रापीडं प्रेक्ष्य विलासिनीनां विलासवर्णनम्, पुण्डरीकमवलोक्य महाश्वेतायाः प्रेमोद्रेकवर्णनम्, चन्द्रापीडं निरीक्ष्य कादम्बर्या मनोभाववर्णनम्, पुण्डरीकनिधने महाश्वेतायाः कपिञ्जलस्य च विलापवर्णनं बाणस्य सूक्ष्मेक्षण सहृदयत्वं सहानुभूतिप्रवणत्वं च परिचाययति।

वागीशस्य बाणभट्टस्य अद्वितीयायां गद्यकृत्यां कादम्बर्यां शुकनासस्य विशिष्टस्थानमस्ति। कादम्बरी अस्याः कृत्या नायिका चन्द्रापीडश्चास्य नायकोऽस्ति। चन्द्रापीडमुपदेष्टुं प्रवर्तमानः शुकनासो युवराजस्य पितुः तारापीडस्य सभायां रत्नमिवामात्य आसीत्। स्वयञ्च तारापीडो नाम नृपः स्ववैदग्ध्यदाक्षिण्यौदार्यपक्षपातराहित्यातुलपराक्रमत्वमन्मथसमरूपत्वविजितो-

यत्वयोगित्वन्याय्यदण्डविधानत्वयुतोऽवर्तत। तस्य राज्ञो निखिलशास्त्रकलावगाह गम्भीरबुद्धिः, आशैशवादुपारूढनिर्भरप्रेमरसः, नीतिशास्त्रकुशलः, सकलवेद-वेदाङ्गवित्, युधिष्ठिर इव धर्मानुरागी, बृहस्पतिशुक्रवसिष्ठविश्वामित्र धौम्य-दमनकप्रभृतिगुरुसमः समस्तप्रजोपयोगिकार्येषु स्थापितमतिरमात्यो ब्राह्मणः शुकनासो नामासीत्।

अतः समुपस्थिते चन्द्रापीडस्य राज्याभिषेककाले शुकनासाचार्यः तत्र आजगाम। समाप्तसकलविद्यस्य पठितसर्वशास्त्रस्य चन्द्रापीडस्य राज्याभिषेकं चिकीर्षुः राजा स्नानयोग्यसामग्रीसङ्ग्रहार्थम् आज्ञां दत्तवान्। यद्यपि राजसूनवे चन्द्रापीडस्य अल्पमपि उपदेष्टव्यम् अवशिष्टं नासीत् तथापि तस्मै विनीततराय राजन्याचार्यः शुकनासो यदब्रवीत् तदेव कादम्बर्याः पूर्वभागे शुकनासोपदेशनाम्ना ज्ञायते।

शुकनासोपदेशे वेदवेदाङ्गधर्मशास्त्रोक्तवचांसि शर्करेवानुस्यूतानि वर्तन्ते। तेषां वचसां सार्वकालिकोपयोगिता सार्वराज्यतान्त्रिकी च व्यावहारिकता अस्ति।

चन्द्रापीडस्य उपदेशपात्रतां विनिश्चित्यैव शुकनासेन उपदेशः प्रदत्तः चिन्तितं खलु अमात्येन चन्द्रापीडस्य निर्मलमनसि उपदेशगुणाः तथैव प्रवेशं लप्स्यन्ते यथैव चन्द्रस्य किरणाः स्वच्छस्फटिकमणौ प्रवेशं लभन्ते।

उपदेशकर्तारः कामं भवन्ति परन्तु उपदेशग्रहीतारो हि दुर्लभा लोके। सामान्यतया उपदेशस्य अनानुकूल्यं हि दरीदृश्यते। गुरुवचांसि यद्यपि निर्मलजलमिव भवन्ति तथापि श्रोत्रयोः पतितं स्वच्छजलमपि कष्टकरमिव अनुभूयते योग्या विनीताः तदीयोपदेशग्राहिणो राजपुत्राश्चेद् भवन्ति तर्हि धर्मशास्त्रगुरूणां साक्षादनुभवप्रायोपदेशवचांसि हस्तिनः शङ्खाभरणशोभासमूहमिव तेषां राज्ञामधिकां शोभां कारयन्ति।

गुरूपदेशः चित्ते वार्धक्यकालानुरूपां क्षान्तिं जनयति तच्च विनैव पलितकेशैर्जायते।

यतो हि चन्द्रापीडो नास्ति विषयभोगानामास्वादने रञ्जितोनुरक्तः तेनास्ति तस्य उपदेशभाजनता। अन्यथा तु कामनासहस्रैः आहृतचित्तेषु उपदेशस्य वचसामौचित्यमेव नास्ति दुष्प्रकृतीनाम् अविनीतानाञ्च उच्चकुलजन्म अध्ययनं वा निष्फलं जायते।



Scanned by TapScanner

सम्पद्यमानयौवराज्याभिषेकार्हाय चन्द्रापीडाय उपदेशस्य महत्वं प्रभावञ्च शुकनासाचार्य एवमाकलितवान् (उत्प्रेक्षागर्भितरूपकानां षड्डुत्कलिकेव सन्ति इमानि वचांसि)- गुरूपदेशः खलु अजलं स्नानमिव अखिलमलप्रक्षालनक्षमं, श्वेतकेशादिविकृतरूपजरसा विहीनं वृद्धत्वमिव, गुरुकरणमिव महद्भारभावनमिव परन्तु मेदोवृद्धिदोषविरहितं, कर्णभूषणमिव शोभाकरं यद्धि न सुवर्णनिर्मितमथवा कृत्रिमम्, आलोककरः परन्तु ज्योतिदीपसाहाय्येन विनैव, सततजागरणमिव परं नोद्वेगजनकः।

चन्द्रापीडः संस्कारवान् आसीत् यतो हि तस्य संस्काराः पित्रा तारापीडेन तथा च शुकनासाचार्येण सम्यक् सम्पादिताः। अत उपदेशस्य तत्त्वार्थं ग्रहीष्यमाणस्य चन्द्रापीडस्य गुणैरुत्पादिततुष्ट्या एवमुक्तवान् आचार्यः - सर्वथा कल्याणैः पित्रा क्रियमाणमनुभवतु भवान्नवयौवराज्याभिषेकमङ्गलम्।' अन्यच्च कुलपरम्परया प्राप्तं राज्यभारमुद्वहतु भूयश्च एवं प्रयत्नं क्रियतां यथा शत्रूणां शमनं, स्वबन्धुवर्गस्योन्नतिश्च भवेत्। किञ्च, अभिषेकानन्तरं समस्तभूमिमण्डलं पुनर्विजेतव्यं यस्मिन् पितृराज्याधिष्ठातृत्वमासीत्। एवङ्कारणेन स्वायत्तपार्थिवो त्रिकालदर्शी योगी इव सिद्धशासनो भवति।

उपदेशवचोभिः प्रभवितो राजकुमारः चन्द्रापीडः स्वात्मानं सर्वथा प्रक्षालित इव, स्वच्छीकृत इव, बुद्ध इव, सचेता इव, पवित्रीकृत इव अनुभूतवान्।

शुकनासोपदेशो कवेः प्रतिभायाश्चरमोत्कर्षो लक्ष्यते। तत्र कवेर्लेखनी भावोद्रेके प्रवहमानेव प्रतीयते शुकनासोपदेशो साक्षात् प्रतीयते यत् - 'वाणी बाणो बभूव ह' इति एतादृशवाक्यानि महाकवेर्बाणस्य अनितरां पाण्डित्यं काव्यवैखरीं च दर्शयन्त्येव।



Scanned by TapScanner